# सिद्धे शब्दार्थसम्बन्धे इति वार्तिकविमर्शः

डॉ. हरेन्द्रकुमारभार्गवः*

drhbhargav@gmail.com

**सारः**

*लोकेऽस्मिन् 'गौरागच्छति' इत्यादिवाक्येभ्यो गवागमनरूपार्थप्रतीतिः गौरश्व इत्यादिशब्दश्रवणानन्तरं गवाश्वादीनां प्रतीतिश्च दृश्यते। किन्तु सर्वः शब्दः सर्वमर्थं न बोधयति, कश्चित् शब्दः कमपि विशेषार्थमेव बोधयति। यथा- घटशब्दोच्चारणे घटरूपार्थस्यैव प्रतीतिर्भवति, न तु पटरूपार्थस्य। तेन ज्ञायते शब्दार्थयोरस्ति कश्चन सम्बन्धः। अतः शब्दः स्वसम्बद्धमेवार्थं बोधयति। शब्दार्थयोस्सम्बन्धः काव्यप्रकाशे अन्विताभिधानवादिमतमुपपादयता आचार्यमम्मटेन प्रमाणत्रयेण निर्धारितः। तस्यायमभिप्रायः- बालकः पूर्वं प्रयोजकबृद्धेन उच्चारितं शब्दं श्रृणोति, तदनन्तरं प्रयोज्यबृद्धेन क्रियमाणं घटानयनादिरूपं कार्यं दृष्ट्वा अनुमिनोति, 'अयं प्रयोज्यबृद्धः' प्रयोजकवृद्धोच्चारितवाक्यजन्यज्ञानवान्, तादृशचेष्टादिमत्वात्। एवं च प्रयोजकवृद्धोच्चारितवाक्ये तादृशीं वाक्यार्थप्रतीतिमनुमानेन निश्चित्य, तदनन्तरं वाक्य- वाक्यार्थयोः सम्बन्धमर्थापत्तिप्रमाणेन निश्चिनोति। तथाहि यदि अस्य वाक्यस्य अनेन वाक्यार्थेन सह सम्बन्धो न स्यात्, तदा तद्वाक्येन तादृशवाक्यार्थप्रतीतिर्न स्यादिति। पश्चाच्च अवापोद्वापाभ्यां शब्दार्थयोः सिद्धः सम्बन्धः। एतस्माज्ज्ञायते यल्लोकात् शब्दो सिद्धः, अर्थो सिद्धः, तयोः सम्बधोऽपि सिद्धः। तत्र वार्तिककारकात्यायनेन 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकस्य किमर्थमुल्लेखनं कृतमिति जिज्ञासा समुदेति। शोधपत्रेऽस्मिन् शब्दस्य किं स्वरूपम्, शब्दार्थयोः सम्बन्धः कः, "सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकस्य व्याख्यानम्, कं पदार्थं मत्वा विग्रहः, भर्तृहरिमतम्, शब्दकौस्तुभकारस्य मतं निष्कर्षश्चेति मुख्यप्रतिपाद्यविषयाः सन्ति।*

**Keywords**: शब्दार्थसम्बन्धः, वार्तिकविमर्शः, भर्तृहरि, महाभाष्य

## १. शब्दः

शब्दस्वरूपविषये भवन्तो जानन्त्येव यद् 'अथ गौरित्यत्र कः शब्दः'[१] इति महाभाष्यकारेण प्रश्न उद्भावितः। तस्यायं भावः यथा- संस्कारशब्दोऽनेकार्थेषु प्रसक्तः, तथैव 'गौः' शब्दस्याऽपि बहुष्वर्थेषु प्रयोगो दृश्यते, अतः कः शब्दः, शब्देन कः ग्राह्य इति सन्देहे शब्दस्य द्वौ भागौ स्वरूपभागोऽर्थभागश्च स्तः। यदि

*प्राध्यापकः, व्याकरणविभागः, काशीहिन्दूविश्वविद्यालयः वाराणसी।

१ महाभाष्यपस्पाशाह्निके पृ.१२

स्वरूपभागो गृह्यते तर्हि तस्यान्वाख्यानं व्यर्थं स्यात्। यतोहि गौरित्याकारकाकृतिः न कुत्रापि शास्त्रेऽवलोक्यते। तस्मादर्थभागस्यैव ग्रहणं भवेत्। तत्रार्थभागग्रहणेन शब्दस्य द्रव्यगुणक्रियाकृतय इत्युपस्थिताः भवन्ति। एतेषु शब्देषु कः शब्दः शब्देन कः ग्राह्य इति प्रश्न उपस्थापितः पतालिना। तत्र द्रव्यक्रियागुणाकृतीनां शब्दानां खण्डनं [२] कृत्वा प्रतिपादयति - **'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'। अथवा 'प्रतीतपदार्थको लोके ध्वनिः शब्दः'** इत्युच्यते[३]।

शब्दविदो द्वौ शब्दौ मन्यन्ते[४]। एकः स्फोटात्मक अपरश्च ध्वन्यात्मकः[५]। तत्र ध्वनिव्याकः स्फोटव्यङ्ग्याोऽस्ति। अत एव ध्वनिरूपरूषितः स्फोट इति।

## २. सिद्धे शब्दार्थसम्बन्धे

**'किं पुनर्नित्यः शब्द आहोस्वित् कार्यः'?**[६] व्याडिकृतसंग्रहनामकग्रन्थे[७] नित्यानित्ययोः विषये सम्यक्तया प्रतिपादनं कृतम्। तत्रोभयथा लक्षणं स्वीकृत्य शास्त्रं प्रवृत्तम्। किन्तु पाणिनिविरचितशब्दशास्त्रं कं पदार्थं स्वीकृत्य प्रवर्तत इति जिज्ञासा समुदेति। तत्र पाणिनिविरचितशब्दशास्त्रं नित्यः शब्द इति स्वीकृत्य प्रवर्तते। एवमर्थोऽपि नित्यः, तयोः सम्बन्धोऽपि नित्यः, पदस्य तदर्थस्य च नित्यत्वेन तयोः सम्बन्धस्यापि नित्यत्वात्। तथा चोक्तं वार्तिककारेण-**"सिद्धे शब्दार्थसम्बन्धे"**[८] इति। शब्दश्चार्थश्च सम्बन्धश्चेति शब्दार्थसम्बन्धा इत्यत्र समाहारसमासो बोध्यः। अत्र शब्दो नित्यः, अर्थो नित्यः, तयोः सम्बन्धोऽपि नित्यः एवास्ति। तत्र सम्बन्धश्च प्रत्यासत्या शब्दार्थयोरेव। शब्दार्थयोः सम्बन्धश्च शक्तिरूपं तादात्म्यमेव। तादात्म्यंच 'तद् भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमि'ति गृहीयते।

अत्र जिज्ञासासमुदेति यत् 'सिद्धे शब्देऽर्थे सम्बन्धे च' इत्यत्र सिद्धशब्दस्य कोऽर्थः[९]। तत्र सिद्धशब्दः नित्यपर्यायवाची वर्तते। कथं ज्ञायते? यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। स सिद्धशब्दो गृह्यते। यद्यपि सिद्धः

---

२ 'किं यत्तद् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः? नेत्याह। द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः? नेत्याह। क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः? नेत्याहः। गुणो नाम सः। यत्तर्हि तद् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः। नेत्याह। आकृतिर्नाम सा। "महाभाष्यपस्पशाह्निके पृ. 14-17

३ महाभाष्यपस्पशाह्निके पृ. *19*

४ द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥ वाक्यपदीयब्रह्मकाण्ड *44*

५ ग्रहणग्राह्योः सिद्धा नियता योग्यता यथा।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः॥ वाक्यपदीयब्रह्मकाण्ड *97*

६ महाभाष्यपस्पाशाह्निके पृ. *57*

७ संग्रह एतत्प्राधान्येन परीक्षितम्- नित्यो वा स्यात्कार्यो वेति। महाभाष्यपस्पाशाह्निके पृ. *58*

८ महाभाष्यपस्पाशाह्निके पृ. *59*

९ अथ सिद्धशब्दस्य कः पदार्थः। महाभाष्यपस्पाशाह्निके पृ. *59*

सूपः, सिद्धः ओदनः, सिद्धा यवागू इत्यादौ सूपौदनयवागूनामपि विशेषणत्वात् नायं नित्यपर्यायः सिद्धशब्द इति वक्तुं शक्यते। अत्र सिद्धशब्दः नित्यार्थस्य पर्यायेण वाचकः। कदाचित् नित्यशब्दस्तमर्थं ब्रवीति, कदाचित् सिद्धशब्दः। यदा स्वरूपमाश्रीयते नित्यः इत्यस्य स्वरूपस्य नित्यशब्दस्य यः पर्यायस्तद्वाची सिद्धशब्दः। पर्यायशब्दः शब्दान्तरनिरपेक्षस्तमर्थं ब्रवीति। यथा 'इन्द्रः शक्रः पुरन्दरः' इति। पर्यायवाचिनोऽपि सामान्यविशेषभावे सामानाधिकरण्यं दृश्यते। वराहशब्दः पर्वते सूकरे च वर्तते, प्रसिद्धतरस्तु सूकरे। परन्तु पर्वते सामानाधिकरण्यात् दृश्यते। यथा- 'वराहो हिमवान्' 'वराहः पारियात्र' इति। तत्र यथैव वराहशब्दः पर्यायः सन् शब्दान्तरोपसंहितः प्रयुज्यते विशेषप्रतिपत्त्यर्थं पृथिव्यादीनामुपादानमिति न विरुध्यते पर्यायशब्दत्वम्। शुक्लशब्दस्तु पर्यायो भूत्वा प्रवर्तते शुक्लवस्त्रमिति। अत सिद्धशब्दो नित्यार्थस्य पर्यायवाचकोऽस्ति। सिद्धशब्दः नित्यार्थस्य वाचकः इत्यस्मिन् प्रसङ्गे चत्वारि प्रमाणान्युपस्थापितानि सन्ति महाभाष्यकारेण। तानि च-

**३.१ संग्रहनामकग्रन्थे।**

**३.२ सन्त्येकपदान्यप्यवधारणानि।**

**३.३ पूर्वपदलोपोऽत्र द्रष्टव्यः।**

**३.४ व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्।**

## २.१ संग्रहनामकग्रन्थे

व्याडिकृते लक्षश्लोकसंख्यात्मके संग्रहनामकग्रन्थे पक्षद्वयविचारावसरे कार्यप्रतिपक्षार्था- भिधायित्वेन सिद्धशब्दः समुपस्थापितः। तत्र प्रस्तुतं किं कार्यः शब्दः अथ सिद्ध इति। अत्र कार्यशब्दसन्निधानत्वात् सिद्धशब्दोऽपि अनित्यार्थस्य प्रतिपादक इति वक्तुं न शक्यते। यतोहि ''कार्यो न कार्यः सिद्ध इति'' इत्यत्र कार्यत्वप्रतिषेधात् सिद्धत्वाप्रतिषेधाच्च सिद्धशब्दः नित्यार्थस्य वाचकोऽस्ति। तथैव समानतन्त्रत्वादिहापि नित्यपर्यायवाचिन एव ग्रहणं भवति।

## २.२ सन्त्येकपदान्यप्यवधारणानि

यत्रैवकारः श्रूयते तत्र द्विपदमेवधारणमस्ति। अत्र अवधार्यमाणस्यार्थस्य शब्दान्तरेणोपात्तस्यानवद्योतिमवधारणमवद्योत्यत एवशब्देन। यदा त्वर्थप्रकरणादेः सोऽर्थऽभिव्यज्यते तदैवशब्दो न श्रूयते इत्यवधारणमेकपदमित्युच्यते[१०]। तत्र न कश्चिदपो भक्षयतीति (अब्भक्षः)। अब्भक्षश्रुतिः सामर्थ्यादन्यनिवृत्तिपरा। अप एव यो भक्षयति स आनीयतामिति। तथा यः सम्प्रत्यब्भक्षः सम्पन्न इति प्रागपि तस्याप्सु प्रवृत्तेरवधार्यन्ते आपोऽन्यनिवृत्यर्थम्। अतोऽब्भक्ष इत्यनेन अपेव भक्षयतीति बोध्यते। तद्वदत्रापि सिद्ध एव यो न साध्य इति।

## २.३ पूर्वपदलोपोऽत्र द्रष्टव्यः

पूर्वोत्तरलोपोपायेनापि वक्तुं शक्यते। तत्र उच्चरितस्य देवदत्तशब्दस्य लोपोपायः आचार्यपाणिनेः सूत्रेणैव ज्ञातुं शक्यते। एकपदोपलब्धौ समुदायस्मृतिः इति नियमात् सम्पूर्णाऽर्थस्य वाचको भवति शब्दः। परन्त्वेतत् न सम्यकस्ति। यतोहि प्रतीयमानादर्थप्रत्यायनं न चानुमानिकस्य संस्कारं करोति। किन्तु नामकरणकाले अनुनिष्पादितो नान्तरीयकत्वाद्वाजिनवत् सह निष्पद्यते। तद्यथाभिक्षार्थिनः क्षीरमुपादानस्य

---

१० महाभाष्यपस्पाशाह्निके पृ. *20*

एकसाधनसाध्यमामिक्षयैककालां वाचिनमपि निष्पद्यते। एवं सत्यभामाशब्देन सह सत्यशब्दो भामाशब्दश्च निष्पाद्यते। तच्च पाणिनिर्लोपद्वारेणैवं भूतानामनुनिष्पादिनां साधुत्वं प्रतिपाद्यते। एवमिह सिद्धशब्दोऽत्यन्तसिद्धशब्दानुनिष्पादी यः स प्रतिपादितः।

### २.४ व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्

शब्दो नित्यः कार्यो वेतिसन्देहे वृद्धव्यवहारात् पदार्थसम्बन्धानां नित्यत्वं संग्रहादौ प्रतिपादितम्। अत्रापि व्याख्यानतः सिद्धशब्दो ग्रहीष्यते। यथा- वृद्धिरादैजित्येवमादयो व्याख्यानाद् ज्ञायते। तद्वदत्रापि सिद्धशब्दो नित्यार्थस्य वाचकोऽस्ति। अत्र नित्यशब्दः कथं नोपात्तम्, यस्मिन्नुपादीयमानेऽसन्देहः स्यात्। यतोहि अत्र सिद्धशब्दो मङ्गलार्थं प्रवर्तते, अस्मात् कारणान्नोपात्तम्। मङ्गलत्वं नाम निरुपकृष्टाभिमतार्थसिद्धिर्मङ्गलम्। तदर्थं च यदुपादीयते तदपि तदर्थत्वाद् मङ्गलमित्याख्यायते। तत्र मङ्गलार्थमभिप्रेतार्थसिद्ध्यार्थम्। महाभाष्ये **'मङ्गलादीनि हि शास्त्राणि अध्ययनस्यावच्छिेदात् वर्द्धन्ते, श्रोतॄणां परैरपराजयाद् वीरपुरुषाणि शास्त्रानुष्ठानेन धर्मोपचयादायुर्वर्द्धनादायुष्मत्पुरुषाणि च भवन्ति, अध्येतारश्च निर्वृत्ताध्ययना भवेयुरिति प्रतिपादनाय सिद्धशब्दादौ प्रयुक्तवान् न तु नित्यशब्दः[११]।**

किंच नित्यप्रहसितो नित्यप्रजल्पित इत्यादिप्रयोगदर्शनाद् यद् नित्यशब्दो बाहुल्येऽपि[१२] प्रयुज्यते, न तु कूटस्थेष्वविचालिषु भावेष्विति। नित्यार्थप्रतीतये व्याख्यानमाध्यमेन नित्यपर्यायवाचित्वं गृह्यते। पूर्वं मङ्गलार्थः सिद्धशब्दः प्रयुक्तोऽस्ति। अत एव वार्तिककारेण सिद्धशब्द एवोपात्तः न तु नित्यशब्दः।

## ३. कं पदार्थं मत्वा विग्रहः -

'सिद्धे शब्देऽर्थे सम्बन्धे च' इत्याकारको विग्रहः 'आकृतिः' पदार्थ इति पक्षमाश्रित्य क्रियते, न तु द्रव्यं पदार्थ इति पक्षम्, यतोह्याकृतिर्नित्या द्रव्यंचानित्यम्। तत्र द्रव्ये पदार्थे 'सिद्धे शब्देऽर्थे सम्बन्धे च' इत्याकारको विग्रहः स्यात्। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः। अथवा 'सिद्धे शब्देऽर्थे सम्बन्धे च' इति विग्रहो द्रव्य एव पदार्थे न्या्ययः, यतोहि द्रव्यं नित्यम्, आकृतिरनित्या। तद्यथा- मृतिकैव संस्थानविशेषती पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते[१३]। अपरंच सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गसवर्णे कुण्डले निर्मीयेते[१४]। एताभ्यामुदाहरणाभ्यां ज्ञायते यदाकृतिः भिन्ना-भिन्ना भवति। किन्तु द्रव्यं पुनस्तदेवाकृत्युपमर्देन द्रव्यमेवावशिष्यते।

वस्तुतस्तु आकृतिपदार्थं मत्वा विग्रहः क्रियते। यतोहि आकृतिर्नित्या। तद्यथा- जातिगुणक्रियायदृच्छाशब्देषु बोधो जायते। यथा- गोशब्दे वाहीकस्य, संज्ञाशब्दे च द्रव्यस्य। तत्र क्रियां

---

११ महाभाष्यपस्पाशाह्निके पृ. *61*

१२ महाभाष्यपस्पाशाह्निके पृ. *62*

१३ महाभाष्यपस्पाशाह्निके पृ. *63*

१४ महाभाष्यपस्पाशाह्निके पृ. *63*

प्रतिपद्यमानं द्रव्यं गामानयेति पररूपेणाभिधीयते। एवं शुक्लो गौरिति शुक्लत्वेनैकार्थसमवेतसमवायेन गोत्वमुपलभ्यते। एको ब्राह्मण इत्येकत्वेन ब्राह्मणत्वमिति सर्वे शब्दाः आकृतिमाह। अत आकृतिपदार्थं मत्वा विग्रहः कर्तव्यः। तत्र नित्यः शब्दो नित्योऽर्थो सम्बन्धः इत्येषा शास्त्रव्यवस्था। शब्दार्थसम्बन्धानामनित्यत्वे हि तत्र पुरुषाणां स्वातन्त्र्ये शब्दार्थसम्बन्धा स्वेच्छयाऽन्यथापि कृता भवेयुरिति शब्दार्थसम्बन्धानां स्वविषयाणामव्यवस्थया शास्त्रमपि न व्यवतिष्ठेत। तेषां नित्यत्वे तु सर्वस्यापि व्याकरणशास्त्रस्य विभिन्नकर्तृकस्याव्यवस्थापकत्वं सिध्येत। कारिकायां नित्यः शब्दः नित्योऽर्थः इति आकृतिर्निर्देशः। अर्थात् शब्दपदेन शब्दाकृतिरभिधीयते एवमर्थपदेनार्थाकृतिः। यतो हि ''जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्'' इति सूत्रेण, ''आकृत्युपदेशात् सिद्धम्''[१५] इति वार्तिकेन 'आकृतिं वाजप्यायनः' इति स्वरूपसूत्रस्थभाष्येण चाकृतिमभिधेयं स्वीकृत्य व्याकरणशास्त्रं प्रवृत्तमस्तीति प्रतीयते। व्यक्तीनामानन्त्येन तत्र शक्तिकल्पने गौरवम्। तात्पर्यमिदं यद् यद्येकस्यां व्यक्तौ शक्तिरभ्युपगम्यते, तदा व्यक्त्यन्तरस्य बोधो न स्यात्। एकव्यक्तिविषयकशक्तिज्ञानादपर- व्यक्तिविषयकशाब्दबोधाभ्युपगमे तु गोव्यक्तिविषयकशक्तिज्ञानादश्वविषयबोधापत्या तद्व्यक्तिविषयकशक्तिज्ञानस्य तद्व्यक्तिविषयकबोधे हेतुत्वेनावश्यकल्प्यतयैकविषयक- ज्ञानादपरव्यक्तिबोधानुदयापत्या सकलव्यक्तिभानार्थं तावद् व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया जातावेव शक्तिकल्पनोचिता। यद्यपि 'गौर्गोपदवाच्यः' इति शक्तिग्रहो व्यक्तिविषयकोऽपि, तथापि ''सविशेषणे हि विधिनिषेधो विशेषणमुपसङ्।चमतः सति विशेष्यबाधे'' इति न्यायेन जातावेव सत्तां परिच्छिनत्ति। यद्वा जातिविशेष्यक एव शक्तिग्रहः 'गौर्गोपदशक्यः' इति जातिशक्तिवाद एवमेवाभिलापात्।

एवंच तथा घटशब्दस्यैकघटव्यक्तौ शक्तिस्वीकारे घटव्यक्त्यन्तरबोधेन शक्तिग्रहबोधयोः कार्यकारणभावे व्यभिचारः, सर्वासु घटव्यक्तिषु शक्तिस्वीकारे शक्त्यानन्त्यमिति घटत्वजातौ शक्तिः स्वीक्रियते। एवमेकस्य घटशब्दस्य शक्तत्वे घटशब्दान्तराद्बोधेन व्यभिचारः, सर्वस्य शक्तत्वे च शक्त्यानन्त्यमिति घटशब्दत्वजातिः शक्त्याश्रयत्वेन स्वीक्रियते। आकृतिश्चात्र जातिः, न त्ववयवानां सन्निवेशः, 'एका आकृति सा चाभिधीयते'' इति सरूपसूत्रस्थभाष्यात् ''प्रख्याऽविशेषात्'' इति सरूपसूत्रस्थवार्तिकस्य ''प्रख्या.....बुद्धिः, तस्या एकरूपत्वात्तद्विषयस्याप्यैक्यं प्रतीयते। गुणप्रमाणादिभिन्नेष्वपि गोपिण्डेषु 'गौः गोः' इत्येकाकारप्रत्ययोदयादवश्यमेकेनालम्बनेन सामान्येन भाव्यमिति जातिसद्भाव एकत्वंचावसीयते। इत्याकारककैयटव्याख्यानंच। जाति हि नित्या शब्दार्थव्यक्तीनान्तु प्रत्यक्षेणैवोत्पादविनाशानुभवात्। शब्दार्थसम्बन्धस्तु स्वरूपेणैव नित्यः समवायवत्। ननु पदशब्दत्वादिरूपजातेर्वाचकत्वे तस्याः सर्वदा सत्वात् सर्वपदार्थबोधापत्तिरिति चेत् न; तत्तद्वर्णोच्चारणेनाभिव्यक्ता सती साऽर्थबोधिका, न स्वरूपसतीत्यङ्गीकारेण दोषाभावात्। उक्तंच हरिणा-

**अनेकव्यक्त्यभिव्यङ्ग्याा जातिः स्फोट इति स्मृताः।**

वस्तुतस्त्वाकृतिः नित्या अस्ति। तमर्थप्रवृत्तये नेदं नित्यस्य लक्षणमुक्तं महाभाष्यकारेण यद् ''ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्यवृद्ध्याव्यययोगि यत्तन्नित्यमिति''। तदपि ''नित्यं यस्मिंस्तत्त्वं न

१५ महाभाष्यपस्पाशाह्निके

विहन्यते'' इत्युक्तम्। अतः एषामनित्यतां परिहारार्थमिदं नित्यस्य लक्षणं प्रवृत्तम्। सा चानित्यता त्रिविधा अस्ति। ताः च- १. संसर्गानित्यता २. विपरिणामानित्यता ३. वस्तुविनाशानित्यता। **संसर्गानित्यता-** यथा स्फटिकस्योपाश्रयविशेषैः संसर्गभिर्द्रव्यान्तरैः प्रच्छादितं स्वरूपं नोपलभ्यते स्वतः सच्च तदपि। **विपरिणामानित्यता-** यथा बदरस्य श्यामतातिरोभावे रक्तस्य प्रादुर्भावो भवति। **वस्तुविनाशानित्यता-** यः सर्वेण सर्वध्वंसो भवति। सा वस्तुविनाशानित्यता पदवाच्याऽस्ति। अतः आकृतिः नित्या तस्याः तत्वविनाशाभावात्। तस्मादाकृतिः पदार्थं मत्वा विग्रहो प्रवर्तत इति।

## ४. भर्तृहरेर्मतम्

पाणिनिः शब्दार्थसम्बन्धानां स्रष्टा स्मर्ता वेति जिज्ञासा कृता भर्तृहरिणा। तत्र प्रथमः ब्राह्मणोऽभिमानतः प्रजोत्पादनं प्रति स्रष्टा अस्ति। यथा- देवदत्तादिशब्दा। द्वितीयोऽर्थविशेषे केनचित् सङ्केतिता शब्दाः प्रयुक्ताः, तेषां शब्दानां स्मर्ता अस्ति। यथा- केनचिच्छिल्पिना वस्तुविशेषं निर्माय नामविशेषः क्रियते। तद्वदत्रापि शब्दार्थसम्बन्धानां पाणिनिः स्रष्टा अथवा लोकसिद्धशब्दानां स्मर्ता इति जिज्ञासा कृता? किंच 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकं प्रवर्तते। अत्र परमार्थनित्यता व्यवहारनित्यता वा शब्दस्य नित्यशब्दवृत्तिः, अनित्यशब्दवृत्तिः इति सन्देहे विचाराः प्रस्तूयन्ते। किंच संग्रहनामकग्रन्थे द्रव्यपदार्थं मत्वा आकृतिपदार्थंच मत्वा लक्षणं प्रवर्तते इति उल्लेखनं कृतं भर्तृहरिणा भाष्यकारेण च। परन्तु भगवतः पाणिनेः किं स्वीकरोति नित्योऽनित्यो वा? अपरंच इदं शास्त्रं कथं प्रस्तुतमिति प्रश्नस्याशयः।

शब्दः प्रतिनियतो वर्णादिविषयो ध्वनिव्याकः इति आकृतौ व्यक्तौ वा संस्कारः क्रियते। आकृतिर्व्यक्तिर्वा अर्थस्य प्रत्यायिका। तत्र आकृतिसंस्कारस्त्वालम्भनादिवद् व्यक्तिद्वारकः। तत्र नित्यशब्दवादिन इतरेतराश्रयत्वं सुपरिहारं भवति। प्रतिदेशत्वे शब्दानां नियमः सिद्धाः। यथा हम्मतिः सुराष्ट्रे इति। तथा अविशेषेणोपदिष्टस्य डित्थ इत्यादेरर्थविशेष एवावस्थानम्। एवं ह्येते प्रयुक्ताः। केवलं पाणिनिः स्मर्तेति। येषामाकृतिरभिधेया सा नित्या भवति। द्रव्योऽपि पदार्थे व्यवहारनित्यता। यदा यदा घटादयस्तदा तदैवैते एवंसन्निवेशा एवेति सम्बन्धोऽपि योग्यता यथा रूपोपलब्धौ योग्यं चक्षुर्न श्रोत्रमित्येव गृह्यते। अर्थः शब्दप्रयुक्त इति शब्दार्थयोः कार्यकारणलक्षणः सम्बन्धोऽस्ति। स च नित्यः इति।

## ५. शब्दकौस्तुभकारस्य मतम् -

**''सिद्धे शब्दार्थसम्बन्धे''** इति विषये भट्टोजिदीक्षितो नियमविधिस्वरूपसार्थक्यं वदति- 'सिद्धेशब्दार्थसम्बन्धे लोकातोऽर्थप्रयुक्ते शब्दप्रयोगे धर्मनियमो यथा लौकिकवैदिकेषु'' इति। तत्र लोकात् शब्दः सिद्धः, अर्थः सिद्धः, सम्बन्धोऽपि सिद्धः किमर्थमिदं वार्तिकमिति जिज्ञासा प्रतिपादिता। तत्र नियमार्थमिदं सूत्रमित्युक्तम्। तत्र नियमविधित्वं नाम- ''यश्च पक्षेऽप्राप्तमर्थं नियमयति स नियमविधिः''[१६] अर्थाद् विकल्पेन अप्राप्तस्यार्थस्य नियमनमसम्बन्धव्यवच्छेदरूपमवश्यमाचरणं येन विधिवाक्येन क्रियते, तद्विविधिवाक्यं

---

१६ मीमांसापरिभाषा

नियमविधिरित्युच्यते। यथा- दर्शपूर्णमासप्रकरणे स्थितं 'व्रीहीनवहन्ति' इत्यत्रावहनविधिवाक्यन्न भवति चेत्तर्हि दर्शपूर्णमासयागीयेषु व्रीहिषु यदाग्नेय इत्युत्पत्तिवाक्यावगतपुरोडाशो-पयोगितण्डुलनिष्पत्त्यर्थमपेक्षितवैतुष्यकरणार्थमवहननक्रिया भवति। तथैव वैतुष्यकरणार्थं नखविदलनक्रिययाऽपि भवितुमर्हति। उभेऽपि क्रिये एककालावच्छेदेन युगपन्नैव भवितुं शक्यते। अत एव अवहननपक्षे नखविदलनमप्राप्तं स्यात्। एतस्मात् क्रियाद्वयमपि वैकल्पिकं स्यात्। नखविदलनपक्षेऽवहननस्याप्राप्तत्वात् अवहननं विनापि वैतुष्यस्य सत्वेन अवहननस्य पाक्षिकी प्राप्ति भवेत्। अत एव 'अवहननेनैव वैतुष्यं कर्तव्यम्' इति नियमयति। तथैवेहापि शब्दोऽर्थः सम्बन्धश्च लोकतः सिद्धो भवति। यतोहि- अव्युत्पन्नं प्रति व्याकरणशास्त्रस्य प्रवृत्तिः नावलोक्यते 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्''[१७] इति सूत्रस्य शक्तिग्रहोपजीव्यत्वात्। अतः सिद्धशब्दस्य ज्ञानं लोकात् सिद्धोऽस्ति। अस्य वार्तिकस्यावश्यकतैव नास्ति। तस्माद् व्यर्थीभूय ज्ञापयति यन्नियमार्थमिदं वार्तिकम्। तत्र नियमफलन्तु धर्मः। धर्मस्य नियमो धर्मनियमः षष्ठीतत्पुरुषसमासो कर्तव्यः अश्वघासादिवदिति।

सिद्धशब्दोऽत्र नित्यार्थस्य वाचकोऽस्ति। तत्र प्रदीपकारेण संग्रहकारस्य प्रमाणरूपेणोपस्थापितः। तत्रोक्तं 'किं कार्यः शब्दोऽथ सिद्धः' इति पक्षद्वयविचारः कृतः। तत्र कार्यप्रतिपक्षार्थाभिधायी सामर्थ्यात्सिद्धशब्द इति स्थितम्[१८]। तद्वदत्रापि स्वीकृतः। किंच भाष्ये 'एकपदानि' इत्युक्त्वा 'अब्भक्षः' इत्यस्य पदद्वयात्मकस्योदाहरणत्वमसङ्गतमिति न भ्रमितव्यम्, 'एवशब्दप्रयोगे द्विपदमवधारणम्, द्योतकत्वेनैवशब्दस्यापेक्षणात्। यदा तु द्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदा तदेकपदमित्युच्यते। तत्र 'सर्व एवापो भक्षयन्ति' इत्यब्भक्षश्रुतिः सामर्थ्यान्नियममवगमयति- 'अप एव भक्षयन्ति' इति। अत्रापि नित्यानित्यव्यतिरेकेण राश्यन्तराभावात् सिद्धशब्दोपादानाद् नियमोऽवगम्यते 'सिद्ध एव' इति। कार्याणां तु पदार्थानां प्राक् प्रध्वंसावस्थयोरपि सत्वात् सिद्धता नास्तीति न ते सिद्धा एव[१९] कथं पुनर्देवदत्तशब्दे संज्ञात्वेन विनियुक्ते एकदेशः प्रयुज्यते? न ह्यसौ संज्ञात्वेन विनियुक्तः। न चेकदेशात् स्मर्यमाणस्य समुदायस्य वाचकत्वमुपपद्यते, प्रतीयमानस्य प्रत्यायकत्वासम्भवादुच्चार्यमाणस्यैव वाचकत्वात्। एवं तर्ह्यनुनिष्पादिन्योऽवयवसरूपाः संज्ञा विनियोगकाले विनियुक्ता एव। लोपस्तु वर्णानां साधुत्वं मा भूदित्यन्वाख्यायते। इहापि नित्यानित्ययोर्निष्पन्नत्वाविशेषात् सिद्धश्रुतिरुपात्ता प्रकर्षं गमयति 'अत्यन्तसिद्धः'[२०] इति।

द्रव्ये पदार्थे द्रव्यस्यानित्यत्वादर्थग्रहणं सम्बन्धविशेषणार्थमुपात्तम्। नन्वनित्येऽर्थे कथं सम्बन्धस्य नित्यतेति चेत्, न; सम्बन्धस्य च योग्यतारूपत्वेन, योग्यतायाश्च शब्दाश्रयत्वेन शब्दस्य च नित्यत्वेन दोषाभावात्, आकाशवत्तन्निष्ठस्य शब्दस्यापि नित्यत्वेऽपि व्याकाभावात् सर्वदोपलम्भाभाव इत्याशयात्[२१]।

---

१७ अष्टाध्यायी *1/2/45*

१८ महाभाष्यपस्पाशाह्निके पृ. *60*

१९ महाभाष्यपस्पाशाह्निके पृ. *60*

२० महाभाष्यपस्पाशाह्निके पृ. *61*

२१ महाभाष्यपस्पाशाह्निके पृ. *62*

असत्योपाध्यवच्छिन्नस्य ब्रह्मतत्वस्य द्रव्यशब्दवाच्यत्वे तु द्रव्यं नित्यमेव। उपाधिश्च कम्बुग्रीवादिमदाकारादिरूपः कम्बुग्रीवादिमदाकारादिघटत्वादिजातिरूपो वा। भाष्ये आकृतिपदेन यदि तद्यङ्ग्या जातिरूपं गृह्यते, तर्हि तदप्यविद्यापरिणमित्वेन व्याकसंस्थानानित्यत्वेन चानित्यम्, यतः 'आत्मेवेदं सर्वम्'[२२] इति श्रुतिः प्रतिपादयति।

भाष्ये 'न क्वचिदुपरतेति कृत्वा' इत्यत्र 'उपरता' इत्यस्य 'अनभिव्यक्ता' इत्यर्थः। तेनोपपरमशब्दस्य नाशवाचकत्वेन यस्य यस्मिन् काले एकत्र नाशो जातस्तस्मिन्नेव कालेऽन्यत्र तस्य सत्वं न स्यादिति भाष्यं व्याकुप्येतेति शङ्का नोद्भावनीया, अद्वैतेन लोके व्यवहाराभावाद्; व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वाद् नित्यत्वम्।

परमार्थदशायां जातेर्मिथ्यात्वेऽपि लोकव्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते 'अथवा इत्यादिग्रन्थेन भाष्ये। तथा हि- संसर्गानित्यता, परिणामानित्यता, प्रध्वंसानित्यता चेति त्रिविधा अनित्यता भवति।

तत्र संसर्गानित्यता यथा स्फटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन लाक्षाजपाकुसुमादिपररूपभासः। लाक्षाद्यपगमे स्वरूपप्रतिभासात् रूपान्तरप्रतिभासाऽभावः। परिणामानित्यता यथा- बदरीफलस्य श्यामातिरोभावे लौहित्यस्याविर्भावः। प्रध्वंसानित्यता यथा- सर्वात्मना विनाशः एतत्त्रितयाऽनित्यतानिरासेन नित्यता प्रतिपादयितुम् 'ध्रुवं कूटस्थमविचाल्यन-पायोपजनविकार्यनुत्पत्त्यवृद्ध्याव्ययोगि यत्तन्नित्यम्' इति भगवता भाष्यकारेणोक्तं प्रकृते।

अत्र 'ध्रुवं कूटस्थम्' इति संसर्गानित्यता। 'अविचालि' इति परिणामानित्यता, 'अनपाय' इति प्रध्वंसाऽनित्यता च परिहृता[२३]।

शशशृङ्गादिपदार्थानां स्वरूपस्यैवाभावात् कथं नित्यत्वमिति न भ्रमितव्यम्, पदार्थानां बौद्धत्वेन यदा यदा शब्द उच्चार्यते, तदा तदार्थकारा बुद्धिरुपजायत इति प्रवाहनित्यतयाऽर्थस्य नित्यत्वात्। बाह्यः पदार्थो न शाब्दबोधे विषयः, किन्तु बौद्धः। स च प्रवाहनित्य इति तात्पर्यम्।

## ६. निष्कर्षः

'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिके शब्दश्चार्थश्च सम्बन्धश्चेति समाहारद्वन्द्वात् सप्तमी। अत्र शब्दो नित्यः, अर्थो नित्यः, तयोः सम्बन्धोऽपि नित्यः एव अस्ति। तत्र सम्बन्धश्च प्रत्यासत्या शब्दार्थयोरेव। शब्दार्थयोः सम्बन्धश्च शक्तिरूपं तादात्म्यमेव। तादात्म्यं च 'तद् भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमि'ति गृहीयते। वस्तुतस्तु सर्वे शब्दविदः शब्दार्थसम्बन्धं नित्यमङ्गीकुर्वन्ति। उक्तं च वाक्यपदीये -

**नित्याः शब्दार्थसम्बन्धाः समाम्नातः महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः।।**[२४]

---

२२ छान्दोग्योपनिषदि *7/25/2*

२३ महाभाष्यपस्पाशाह्निके पृ. *64*

२४ महाभाष्यपस्पाशाह्निके पृ. *63*

## सन्दर्भग्रन्थसूची

१. **अय्यर के. ए. सुब्रह्मन्यम**, १९९५, वाक्यपदीयम्, डेक्कन कॉलेज पोस्टग्रेजुएट रिसर्च इस्टीट्यूट, पूना।

२. **कील्हार्न एफ.**, व्याकरणमहाभाष्यम् (प्रथमद्वितीयतृतीय-भागाः), भाण्डारकरप्राच्यविद्या शोधसंस्थानम्, पूना, तृतीयसंस्करणम्, १९६२।

३. **चतुर्वेदी मिथिलेश** ‘शब्दार्थमीमांसा’ सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, भारत, १९९२

४. **त्रिपाठी जयशंकरलाल**, काशिकावृत्ति तारा पब्लिकेशन, कमच्छा, वाराणसी, प्रथमसंकरणम्, १९९४।

५. **त्रिपाठी जयशंकरलाल**, व्याकरणमहाभाष्यम्, कृष्णदास अकादमी, वाराणसी, प्रथमसंस्करणम्, वि. सं. २०५५।

६. **नरेन्द्र**, काव्यप्रकाशः, ज्ञानमण्डल लिमिटेड, सन्त कबीर रोड, वाराणसी, षष्टमसंस्करणम्, वि. सं. २०४२।

७. **पाण्डेयहरिवंशकुमारः**, अष्टाध्यायीसूत्रपाठः, भारतीयविद्यासंस्थानम्, जगतगंज, वाराणसी, द्वितीयसंस्करणम्, २००१।

८. **पंचोलीबालकृष्णः**, वैयाकरणभूषणसारः, चौखम्भासंस्कृतभवनम्, वाराणसी, तृतीयसंस्करणम्। प्ृठछ ८१.८६९३७.९८.६

९. **भार्गवशास्त्री**, व्याकरणमहाभाष्यम्, चौखम्बासंस्कृतप्रतिष्ठानम्, जवाहरनगरम्, बंगलो रोड पोस्ट बॉक्स नं० २११३, दिल्ली, २००४।

१०. **मुसलगॉवकर** गजानन शास्त्री, मीमांसापरिभाषा, कृष्णदास अकादमी, वाराणसी, द्वितीयसंस्करणम्, वि. सं. २०५१

११. **शर्मा रघुनाथः**, वाक्यपदीयम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, चतुर्थसंस्करणम्, वि. सं. २०६३।

१२. **शास्त्रीचारुदेव**, व्याकरण महाभाष्य, मोतीलाल बनारसी दास, बंगलो रोड, दिल्ली, पंचमसंस्करणम्, १९९९।

१३. **स्वामिनाथन वी.**, महाभाष्यटीका (दीपिकाप्रथमभागः), काशीहिन्दूविश्वविद्यालयः, वाराणसी, १९६५।

१४. Bronkhorst Johannes ‘Mahabhasyadeepika of Bhartrhari, Bhandarkar oriental research institute, Poona, India 1987.